1

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रीगणेशाय नमः॥ ॐ अस्य श्रीरामरक्षास्तोत्रमंत्रस्य बुधकौशिक विश्वामित्र ऋषिः॥ रामच
न्द्रो देवता अनुष्टुप् छन्दः॥ श्रीरामचन्द्रप्रीत्यर्थे जपे विनियोगः॥१॥ ध्यात्वा नीलोत्पलश्यामं रा
मं राजीवलोचनम्॥ जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम्॥१॥ सासितूणधनुर्बाण
पाणिं नक्तंचरान्तकम्॥ स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम्॥२॥ हन्तुमिच्छति यश्चै
॥१॥ [illegible] यत्नतः॥ रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम्॥३॥ शिरो मे राघवः पातु भा ॥१॥
लं दशरथात्मजः॥ कौशल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती॥४॥ घ्राणं पातु मख
त्राता मुखं सौमित्रिवत्सलः॥ जिह्वां विद्यानिधिः पातु कंठं भरतवन्दितः॥५॥ स्कंधौ दि
व्यायुधः पातु भुजौ भग्नेशकार्मुकः॥ करौ सीतापतिः पातु। हृदयं जामदग्न्यजित्॥६॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रक्षितं रामनामभिः ॥ यः करे धारयेत्तस्य करस्थाः सर्वसिद्धयः ॥१४॥ वज्रपंजरनामेदं
यो रामकवचं स्मरेत् ॥ अव्याहताज्ञः सर्वत्र लभते जयमंगलम् ॥१५॥ आदिष्टवान्य
था स्वप्ने रामरक्षामिमां हरः ॥ तथा लिखितवान्प्रातः प्रबुद्धो मुनिकौशिकः ॥१६॥
२ रामं दुर्वादलश्यामं पद्माक्षं पीतवाससम् ॥ स्तुवंति नामभिर्दिव्यैर्न ते संसारिणो न २
रः ॥१७॥ रामो ममाग्रतः पातु लक्ष्मणः पातु पृष्ठतः ॥ तरुणौ रूपसंपन्नौ सुकुमा
रौ महाबलौ ॥१८॥ पुंडरीकविशालाक्षौ चीरकृष्णाजिनांबरौ ॥ फलमूलाशि
नौ दान्तौ तापसौ ब्रह्मचारिणौ ॥१९॥ पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मध्यंपातुखरध्वंसी नाभिं जामवदाश्रयः ॥ सुग्रीवेशः कटिं पातु सक्थिनी हनुमत्प्रभुः ॥७॥
आपानमेढ्रौ पातु कौशल्यानन्दवर्द्धनः ॥ ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत् ॥
८॥ जानुनी सेतुकृत्पातु जंघे दशमुखांतकः ॥ पादौ विभीषणश्रीदः पातु रामो
ऽखिलं वपुः ॥९॥ एतां रामबलोपेतां रक्षां यः सुकृती पठेत् ॥ स चिरायुः सुखी पुत्री विज
यी विनयी भवेत् ॥१०॥ पातालभूतलव्योमचारिणश्छद्मचारिणः ॥ न द्रष्टुम
पि शक्तास्ते रक्षितं रामनामभिः ॥११॥ रामेति रामभद्रेति रामचन्द्रेति वा स्मरन्
नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति ॥१२॥ एककालं द्विकालं वा पठेन्नाममंत्र
पं तु यः [illegible] ॥१३॥ जगज्जैत्रैकमंत्रेण

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

३ भक्तवत्सल जितेन्द्रियः ॥ जानकीवल्लभः श्रीमानप्रमेयपराक्रमः ॥ रावणान्तकरो धीरः
कौशल्यानन्दवर्द्धनः ॥ २७ ॥ लोकाभिरामं रणरङ्गधीरं राजीवनेत्रं रघुवंशनाथं ।
कारुण्यरूपं करुणाकरं तं श्रीरामचन्द्रं शरणं प्रपद्ये ॥ २८ ॥ विशालनेत्रं परिपूर्ण
॥३॥ गात्रं सीताकलत्रं सुरशत्रुघातम् ॥ सौमित्रिमित्रं जगतः पवित्रं श्रीरामरत्नं प्रण ॥३॥
तोऽस्मि नित्यम् ॥ २९ ॥ श्यामावदान्तमरविन्दविशालनेत्रं बन्धूकपुष्पस
दृशाधरपाणिपादम् ॥ सीतासहायमजितं धृतचापबाणं रामं नमामि शिर
सा रमणीयवेशम् ॥ ३० ॥ श्रीराम राम रघुनन्दन राम राम श्रीराम राम भरता
ग्रज राम राम ॥ श्रीराम राम रणकर्कश राम राम श्रीराम राम शरणं भव राम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शरण्यं सर्वभूतानां श्रेष्ठौ सर्वधनुष्मताम् ॥२०॥ रक्षःकुलनिहंतारौ त्रायेतां नो रघू
त्तमौ ॥ सन्नद्धः कवची खड्गी चापबाणधरो युवा ॥२१॥ पच्छन्मनोरथान्पातु रामो
ऽस्माकं सलक्ष्मणः ॥ धन्विनौ युधि निस्त्रिंशौ काकपक्षधरावुभौ ॥२२॥ वीरौ मां प
थि रक्षेतां तावुभौ रामलक्ष्मणौ ॥ दक्षिणे लक्ष्मणो यस्य वामतो जानकी शुभा ॥
२३ ॥ पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम् ॥ आरामः कल्पवृक्षाणां विरामः
परमापदाम् ॥२४॥ अभिरामस्त्रिलोकानां रामः श्रीमान्स नः प्रभुः ॥ रामो दा
शरथिः शूरो लक्ष्मणानुचरो बली ॥२५॥ काकुत्स्थः पुरुषः पूर्णः कौसल्येयो र
घूत्तमः ॥ वेदांतवेद्यो यज्ञेशः पुराणः पुरुषोत्तमः ॥२६॥ इत्येतानि जपेन्नित्यं म

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा०र०स्तो०

राजेन्द्रं सत्यसिंधुं दशरथतनयं श्यामलं शांतिमूर्त्तिम् ॥ वन्दे लोकाभिरामं र
घुकुलतिलकं राघवं रावणारिम् ॥३७॥ सीतासमेतं सहलक्ष्मणेन सुग्री
वमित्रेण विभीषणेन ॥ रामाभिरामो भुवनाभिरामो राजीवनेत्रो रमणी
१५॥ यगात्रः ॥३८॥ सौमित्रिमित्रो जगतः पवित्रः श्रीरामचन्द्रो रमतां मनो मे ॥४॥
रामरामेति वै नाम जपन्तं चिंतयामि भवबंधमुक्तये ॥३९॥ वन्दितं सु
रनरेन्द्रमौलिभिर्ध्यायते मनसि योगिभिः सदा ॥ श्रीरामनामामृतमं
त्र बीजं संजीवनी चेन्मनसि प्रतिष्ठा ॥४०॥ [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

राम॥३१॥ एतानि यो जपेन्नित्यं मद्भक्तः श्रद्धयान्वितः॥ अश्वमेधायुतं पुण्यं प्रा
प्नोत्यत्र न संशयः॥३२॥ आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषंगसं
गिनौ॥ रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छताम्॥३३॥ मनो
भिरामं नयनाभिरामं श्रोत्राभिरामं वदनाभिरामम्॥ सर्वाभिरामं च सदाभि
रामं वंदे सदा दाशरथिं च रामम्॥३४॥ स्वप्नकाले प्रबोधे च यात्राकाले विशे
षतः॥ नमस्यं विघ्नते तस्य सर्वत्र विजयी भवेत्॥३५॥ रामलक्ष्मणपूर्वजं रघु
वरं सीतापतिं सुन्दरम्॥ काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम्॥
॥३६॥

(C) 0 Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

5

वामत्यो मुखं वा रमतां कुतो भिः ॥ रामेति वर्णद्वयमादरेण सदास्मरन्मुक्ति
मुपैति जन्तुः ॥ ८१ ॥ कलौ युगे कल्मषमानसानामन्यत्र धर्मे खलु नाधिका
रः ॥ आपदामपहर्तारं दातारं सर्वसंपदाम् ॥ ८२ ॥ गुरुणाभिधानं श्रीरामं भू
यो भूयो नमाम्यहम् ॥ कोशाब्जानयने न्दुरश्मि पथतलनयोरविन्दमार्त्तरार
सीतामानसहंसराम राजीवलोचनं वन्दे ॥ ८३ ॥ रामाय रामभद्राय रामच
न्द्राय मेधसे ॥ रघुनाथाय नाथाय सीतायाः पतये नमः ॥ ८४ ॥ इति श्री
पञ्चहरा ... रा ... स्तोत्रं संपूर्णं ...

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Bharatiya Peetham

6

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham